स्वर्द्दते अस्वर्द्दिष्ट । [ गोमेदमणौ राजनि० ।

**सूर्भानव** पु० निस्स्वर्भानो राहोः प्रियः अण् नि०नादिवृद्धिः ।

**सूर्भानु** पु० स्वः स्वर्गे भानुर्दीप्तिरस्य । राहौ अमरः । तस्य भूमिच्छायारूपतया भूमिस्थैर्भानुमत्त्वेनादर्शनात् दिवि दीप्तिमत्त्वात्तथात्वम् । [लोके शब्दच० ।

**सूर्लोक** पु०स्वरेव लोकः भुवनम् । १स्वर्गे हेम० । २स्वर्गस्थे

**सूर्वापी** स्त्री स्व० स्वर्गस्य वापीव । १गङ्गायाम् हेमच० ।

**सूर्वेश्या** स्त्री स्व० स्वर्गस्य वेश्या । मेनकाद्यप्सरस्सु अमरः ।

**स्वर्वैद्य** पु० द्वि०व० । स्वः स्वर्गस्य वैद्यौ । अश्विनीकुमारयोः अमरः । आयुर्वेदशब्दे ७७६पृ० दृश्यम् ।

**स्वलीन** पु० दानवभेदे वह्निपु० ।

**स्वल्प** त्रि० सुष्ठु अल्पम् प्रा० स० । अत्यल्पे क्षुद्रे ।

**स्वल्पकेशरिन्** पु०स्वल्पः केशरो नित्यमस्त्यस्य इनि । कोविदारवृक्षे राजनि० ।

**स्वल्पकेशिन्** त्रि० स्वल्पः केशो नित्यमस्त्यस्य । १अल्पकेशयुते स्त्रियां ङीप् ।२पिशाचभेदे पु०शब्दच० । [रत्नमा०

**सूल्पपत्रक** पु० स्वल्पं पत्त्रमस्य कप् । गौरशाके मधूकभेदे

**स्वल्पफला** स्त्री स्वल्पं फलं यस्याः । हपुषाभेदे राजनि० ।

**सुवासिनी** स्त्रीस्वस्मिन् पित्रालये वसति वस-णिनि ङीप् । चिरं पितृगृहादिवासिन्यामूढायामनूढायां वा स्त्रियाम् । सुवासिनीत्यस्य स्थाने अमरे पाठान्तरम् ।

**स्ववीज** पु० स्वमेव वीजं यस्य । १आत्मनि शब्दर० । २पुत्रे ३कन्यायां स्त्री हेम० । ४निजकारणे न० ५स्वस्य वीर्ये च न० ।

**स्वसृ** स्त्री सु+अस-ऋन् । भगिन्याम् अमरः ।

**स्वस्क** गतौ भ्वा० आ० सक०सेट् । स्वस्कते अस्वस्किष्ट ।

**स्वस्ति** अव्य० सु-अस-क्तिच्, अस्तीति विभक्तिप्रतिरूपकम् अव्ययं प्रादि०वा । १क्षेमे २आशिषि ३पुण्यादौ अमरः ४स्वीकारसूचने च । एतद्योगे क्षेमादिसम्बन्धिनि चतुर्थी ।

**स्वस्तिक** पुं०न० । स्वस्ति शुभाय हितम् ठन् । "स्वस्तिकं प्राङ्मुखं यत् स्यादलिन्दात्तद्गतं भवेत् । तत्पार्श्वानुगतौ चान्यौ तत्पर्य्यन्तगतोऽपरः" इत्युक्तलक्षणे गृहभेदे शाङ्गः । २सितावरशाके पु० राजनि० ३आसनभेदे तल्लक्षणम् आसनशब्दे ८८६ पृ० दृश्यम् । ४तण्डुलचूर्णनिर्मिते त्रिकोणाकारे द्रव्यभेदे च "इतं स्वस्तिकसिन्दूरम्" इत्यधिवासनद्रव्यज्ञापकवाक्यम् ५चतुष्पथे पु० मेदि० । ६जिनध्वजभेदे हेमच० । ७रतताडिके विश्वः

**स्वस्तिमुख** पु० स्वस्ति सुखे वक्त्रे आदौ वा यस्य । १लेख्ये पत्रादौ २विप्रे पु० ३स्वस्तिशब्दादिनि त्रि० मेदि० ।

**सुस्तिवाचन** न० स्वस्ति शुभस्य विप्रद्वारा वाचनम् । कर्मारम्भे विघ्नोपशान्तये ब्राह्मणद्वारा कर्त्तव्यकर्मणां शुभतावाचने । "संपूज्य गन्धपुष्पद्यैर्ब्राह्मणान् स्वस्ति वाचयेत् । धर्म्ये कर्मणि माङ्गल्ये संग्रामेऽद्भुतदर्शने" व्यासः ।

**स्वस्तिवाचनिक** त्रि० स्वस्तिवाचनाय हितं तत आगतम् तत्र भवं वा ठञ् । १स्वस्तिवाचनसाधने २तदुक्तिलब्धे ३तत्सम्बन्धिनि च ।

**स्वस्त्ययन** न० स्वस्ति शुभस्यायनं लाभो यस्मात् । शुभार्थं क्रियमाणे वेदादिविहिते यज्ञयागादौ ।

**स्वस्थ** त्रि० स्वः परलोके तिष्ठति स्वेन स्वभावेन सुखेन, वा वा तिष्ठति स्था-क वा विसर्गलोपः । स्वभावस्थे २स्वर्गस्थिते ३विनायासेन सुखेनावस्थिते च । "स्वस्था भवन्तु मयि जीवति धार्त्तराष्ट्राः" वेणीसं० ।

**स्वस्रीय** पु० स्वसुरपत्यम् छ । १भागिनेये अमरः ३भागिनेय्यां स्त्री टाप् ।

**स्वागत** न० सुखेन आगतम् सु+आ+गम-भावे क्त । १सुखेनागमने "स्वागतं स्वानधीकारान्" कुमारः तदस्यास्तीति अच् २कुशले ३कुशलप्रश्ने हारा० ।

स्वागतञ्च षोड़शोपचारमध्ये द्वितीयोपचारः आसनं स्वगतं पाद्यमित्यादि । उपचारशब्दे दृश्यम् ।

**स्वाङ्गिक** पु० स्वाङ्गमर्हति ठक् । १मृदङ्गे २तद्वादके शब्दर० ।

**स्वाच्छन्द्य** न० स्वच्छन्दस्य भावः ष्यञ् । १स्वाधीनत्वे २स्वास्थ्ये च ।

**स्वातन्त्र्य** न० स्वतन्त्रस्य भावः ष्यञ् । १स्वाधीनत्वे २पराऽनधीनत्वे । व्या० उक्ते इतरव्यापारानधीनव्यापारवत्त्वरूपे कर्त्तृत्वे कर्त्तृशब्दे १७१६ पृ० दृश्यम् ।

**स्वाति(ती)** पुंस्त्री० स्वेनैव अतति अत-इन् स्त्रीत्वपक्षे वा ङीप् । १अश्विन्यादिषु पञ्चदशे नक्षत्रे अमरः "हस्ता स्वातिः श्रवणा अक्लीबे" लि०त० उक्तेरुभयलिङ्गताऽस्य । २सूर्य्यपत्नीभेदे स्त्री त्रिका० ३खड्गे धरणिः ।

स्वातिनक्षत्राधिष्ठातृदेवयोगताराखरूपादिकम् नक्षत्रशब्दे ४६७ पृ० दृश्यम् ।

**स्वातियोग** पु०आषाढशुक्लपक्षे कर्त्ती तिथ् तिथौ माघकृष्णपक्षसप्तम्यां तिथौ च स्वातिनक्षत्रस्थचन्द्रस्य शुभफलादिज्ञापके योगभेदे यथोक्तं ह० सं० २५अ०

"यद्रोहिणीयोगफलं तदेव स्वातावषाढ़ासहिते च चन्द्रे ।